**द्वितीयः अध्यायः**

# विविधता भेदभावश्च

गतपाठे भवन्तः विविधतायाः विषये पठितवन्तः कदाचित् ये जनाः अन्येभ्यः भिन्नाः भवन्ति तेषां परिहासः क्रियते। तथा च ते बहुषु गतिविधिषु अथवा समूहेषु सम्मिलिताः न क्रियन्ते। यदि अस्माकं मित्राणि अथवा अन्ये जनाः अस्माभिः सार्धम् अपि एतादृशं व्यवहारं कुर्युः दुःखम् अनुभवेम तेभ्यः कुप्येम तथा च वयम् असहायाः इति अनुभवेम। किं भवन्तः कदाचित् चिन्तितवन्तः यत् इत्थं किमर्थं भवति ? अस्मिन् पाठे वयम् इदम् अवगन्तुं प्रयासं करिष्यामः यत् एतादृशाः अनुभवाः अस्माकं समाजेन सह तथा च अस्माकं परिवेशे विद्यमानाभिः असमानताभिः सह कथं सम्बद्धाः सन्ति।



**वयं** के स्मः अपि च वयं कीदृशाः स्मः, इदं बहुषु तथ्येषु आश्रितं भवति। वयं कथं वसामः, काः भाषाः वदामः किं खादामः, किं धरामः, कीदृशीः क्रीडाः क्रीडामः अपि च कान् उत्सवान् आचरामः, एतेषु उपर्युक्तेषु सर्वेषु सन्दर्भेषु अस्माकं भूगोलस्य इतिहासस्य च प्रभावः निपतति। यदि भवन्तः सङ्क्षेपेण एव उपर्युक्तेषु बिन्दुषु अवधानम् कुर्युः तर्हि अनुभवं प्राप्स्यन्ति यत् भारतं कियान् विविधतासम्पन्नः देशः अस्ति।

संसारे अष्टौ मुख्याः धर्माः सन्ति। भारते तेषाम् अष्टानां धर्माणाम् अनुयायिनः वसन्ति। अत्र षोडशशतात् (१६००) अपि अधिकाः भाषाः भाष्यन्ते याः जनानां मातृभाषारूपेण सन्ति। अत्र शताधिकप्रकारकाणि नृत्यानि अपि क्रियन्ते।

एषा विविधता सदैव प्रसन्नतायाः कारणात् न निर्मिता भवति। वयं तैः जनैः सह सुरक्षिताः इति अनुभवामः ये अस्माभिः सदृशाः दृश्यन्ते वार्तां कुर्वन्ति वस्त्राणि धरन्ति तथा च अस्माभिः सदृशम् एव तेषां चिन्तनं भवति। कदाचित् वयं यदा तादृशैः

जनैः सह मिलामः ये अस्मभ्यं सर्वथा भिन्नाः भवन्ति तदा ते अस्मासु आश्चर्यं जनयन्ति तथा च अपरिचिताः इति अनुभूयन्ते। कदाचित् वयं ज्ञातुमेव न पारयामः यत् ते अस्मभ्यं भिन्नाः किमर्थं सन्ति। जनाः आत्मनः भिन्नानां विषये विशेष-धारणायाः चिन्तनस्य निर्माणं कुर्वन्ति।

**पूर्वाग्रहः**

**ग्रामीणाः जनाः**

- अर्धाधिकाः भारतीयाः ग्रामेषु निवसन्ति।
- ग्रामीणाः जनाः स्वस्वास्थ्यम् अधिकृत्य जागरूकाः न भवन्ति।
- ग्राम्यजनाः अविकसिताः भवन्ति तथा च ते कृषेः आधुनिकप्रौद्योगिक्याः प्रयोगं कर्तुं न इच्छन्ति।
- सस्यस्य रोपणस्य कर्तनस्य च काले ते १२ तः १४ होराः यावत् कार्यं कुर्वन्ति।
- ग्रामीणाः जनाः कार्यम् अन्वेष्टुं नगराणि प्रति गन्तुं बाध्याः सन्ति।
- नगरीयं जीवनं सरलं न भवति। अत्रत्याः जनाः दुष्टाः तथा प्रमादिनः भवन्ति।
- नगरेषु जनाः स्वपरिवारजनैः सह अधिकं कालं न यापयन्ति।
- नगरस्थाः जनाः धनस्य चिन्तां कुर्वन्ति, जनानां चिन्तां न कुर्वन्ति।
- नगरस्थजनेषु विश्वासः न कर्तुं शक्यते ते भ्रष्टाचारिणः चतुराः च भवन्ति।
- नगरेषु निवासः महार्घः भवति। जनैः यत् अर्जनं क्रियते तस्य कश्चित् महान् भागः भाटकस्य तथा च आवागमनस्य कृते व्ययः भवति।

तानि कथनानि पश्यन्तु यानि भवन्तः ग्रामस्थजनानां नगरस्थजनानां च सन्दर्भे समुचितानि मन्यन्ते तथा च येषु विषयेषु भवतां सहमतिः अस्ति तेषु कथनेषु चिह्नं कुर्वन्तु। किं भवतां मस्तिष्के ग्रामस्थजनानां नगरस्थजनानां च विषये केचन पूर्वाग्रहाः सन्ति ? जनानां मनसि एते पूर्वाग्रहाः किमर्थं भवन्ति ? ये पूर्वाग्रहाः भवद्भिः स्वपरिवेशे अनुभूताः सन्ति तेषां काञ्चित् सूचीं कुर्वन्तु। एते पूर्वाग्रहाः जनानां व्यवहारं कथं प्रभावयन्ति ?

एतेषु उपर्युक्तेषु कानिचन कथनानि सङ्केतयन्ति यत् ग्रामीणजनाः अज्ञानिनः अंधविश्वासिनः च भवन्ति अपरञ्च नगरीयाः जनाः प्रमादिनः चतुराः केवलं धनकारणाद् एव सम्बन्धं स्थापयन्ति इति तेषां विषये अवधारणा अस्ति। यदा वयं पूर्वतः एव कस्यचित् विषये काञ्चन अवधारणां धरामः तथा च ताम् अवधारणाम् स्वमनसि धरामः सा धारणा एव पूर्वाग्रहः इति भवति। प्रायशः एषा अवधारणा नकारात्मिका भवति। यथा कथनेषु प्रदत्तमस्ति- नगरस्थाः जनाः प्रमादिनः चतुराः कृपणाः च सन्ति इत्यपि पूर्वाग्रहः अस्ति।

यदा वयं कस्यचित् कार्यस्य विषये चिन्तयामः यत् एतत् कार्यम् अनेन विधिना एव समुचितरूपेण भवितुं शक्नोति अन्यः कश्चित् विधिः एव नास्ति तदा वयम् तेषां सम्मानं न कुर्मः ये तदेव कार्यं अन्येन विधिना कर्तुम् इच्छन्ति उदाहरणार्थं यदि वयं चिन्तयामः यत् आङ्ग्लभाषा सर्वोत्तमा भाषा अस्ति तथा च अन्याः भाषाः महत्त्वपूर्णाः न सन्ति तदा एतत् तर्हि अन्याः भाषाः प्रति अस्माकं नकारात्मकं चिन्तनं भवति। परिणामतः वयं तेषां जनानां सम्मानं न कर्तुं शक्ष्यामः ये आङ्गलभाषाम् अतिरिच्य अन्याभिः भाषाभिः वदन्ति।



वयं बहुषु सन्दर्भेषु पूर्वाग्रहिणः भवितुं शक्नुमः यथा जनानां धार्मिकविश्वासाः तेषां चर्मणः वर्णः ते यस्मात् क्षेत्रात् आगच्छन्ति यथा ते वदन्ति यादृशानि वस्त्राणि च ते धरन्ति इत्यादीनां विषये वयं पूर्वाग्रहिणः भवितुं शक्नुमः । प्रायः अन्येषां विषये धृताः अस्माकं पूर्वाग्रहाः एतावन्तः सुदृढाः भवन्ति यत् वयं तैः सह मैत्रीं अपि कर्तुम् न इच्छामः । एतस्मात् कारणात् कदाचित् अस्माकं व्यवहारः एतादृशः भवति यत् वयं तान् दुःखितान् कुर्मः ।

**बालिकाबालकयोः मध्ये भेदभावः**

समाजे बालिकाबालकयोः मध्ये अनेकधा भेदभावः क्रियते । वयं सर्वे बालकबालिकाभिः सह क्रियमाणेन एतादृशेन भेदभावेन परिचिताः स्मः । कश्चन बालकः काचित् च बालिका इति धारणायाः अभिप्रायः कः भवति ? भवत्सु बहवः जनाः कथयिष्यन्ति, "वयं बालिकारूपेण अथवा बालकरूपेण जन्म प्राप्नुमः । इयं तु काचित् प्रक्रिया वर्तते । अत्र चिन्तनस्य कः सन्दर्भः ?" आगच्छन्तु, पश्यामः यत् अत्र किं यथार्थमस्ति ?

अधोलिखित-कथनानां सूचीतः तालिकां पूरयन्तु। स्वस्य उत्तरस्य कारणेषु चर्चां कुर्वन्तु ।

ते अतीव सुशीलाः सन्ति ।

तेषां वार्तालापस्य शैली अतीव सौम्या मधुरा च अस्ति ।

ते शारीरिकरूपेण बलिष्ठाः सन्ति ।

ते उद्दण्डाः सन्ति ।

ते नृत्ये चित्रकलायां च निपुणाः सन्ति ।

ते न रुदन्ति ।

ते उपद्रविणः सन्ति ।

ते क्रीडायां निपुणाः सन्ति ।

ते पाककार्ये निपुणाः सन्ति ।

ते भावुकाः सन्ति ।

| बालकः | बालिका |
|---|---|
| १ | १ |
| २ | २ |
| ३ | ३ |
| ४ | ४ |
| ५ | ५ |



## किं तस्याः मस्तिष्कं सम्यक् अस्ति?

केवलम् एतस्मात् कारणात् यतो हि मम पादौ स्खलतः अतः जनाः चिन्तयति यत् मम मस्तिष्कमपि स्खलति।



## जनाः विविधाः वार्ताः कुर्वन्ति

अहं पादेन खञ्जः अस्मि, सम्भाषणकाले वाण्याः स्खलनं भवति एतदतिरिच्य अन्यदपि बहुकिमपि। कदाचिद् अहम् उदासीनः भवामि कदाचिच्च दुःखी भवामि। जनाः मम उपहासं कुर्वन्ति, एषा नूतना वार्ता नास्ति। यदि भवान् मम स्थाने अभविष्यत् तर्हि किम् अकरिष्यत् ?



## भवती अपराभ्यः कियती भिन्ना दृश्यते

अहं काचित् बालिका अस्मि। कुदृष्टिभ्यः अहं निलेतुम् इच्छामि।

उपरितनेषु चित्रेषु ये बालकाः सन्ति ते पूर्वं विकलाङ्गाः इति उच्यन्ते स्मा। एतस्य शब्दस्य स्थाने तेषां कृते येषां शब्दानां प्रयोगः भवति ते इत्थं सन्ति- “विशिष्ट-आवश्यकतावन्तः बालकाः”। तेषां विषये जनानां ये पूर्वाग्रहाः सन्ति ते अत्र प्रदत्ताः सन्ति सार्धमेव तेषां निजभावाः विचाराः च अपि अत्र स्थूलाक्षरैः दर्शिताः सन्ति। एते बालकाः तैः सह सम्बद्ध-रूढिवादि-धारणानां विषये किं वक्तुमिच्छन्ति अपि च किमर्थं वक्तुमिच्छन्ति कुर्वन्तु। भवतां मतानुसारं किं विशिष्टा-वश्यकतावन्तः बालकाः सामान्य-विद्यालयेषु पठेयुःअथवा तेषां कृते पृथक्-विद्यालयाः भवेयुः ? स्व-उत्तरस्य पक्षे तर्कान् यच्छन्तु।

यदि वयं उदाहरणार्थम् एकं कथनं स्वीकुर्मः यत् ‘ते रोदनं न कुर्वन्ति’ तर्हि प्रायः एषः गुणः पुरुषैः अथवा बालकैः सार्धं योज्यते। यदि बाल्यकाले बालकः व्रणितः भवति तर्हि परिवारजनाः एवं कथयन्ति यत् रोदनं मा कुरु” भवान् बालकः अस्ति। बालकाः पराक्रमशालिनः भवन्ति ते रोदनं न कुर्वन्ति। यदा बालकाः यौवनावस्थां प्राप्नुवन्ति तदा तेषाम् अयं विश्वासः द्रढीभवति यत् बालकाः रोदनं न कुर्वन्ति।

यदि कस्यचित् बालकस्य रोदनस्य स्थितिः अपि आपतति तर्हि सः आत्मानं नियन्त्रयति । बालकः मन्यते यत् रोदनं शक्तिहीनतायाः चिह्नमस्ति । यद्यपि बालकबालिकयोः कदाचित् रोदितुं मनः भवति विशेषतया यदा ते क्रोधिनः अथवा दुःखिनः भवन्ति । परन्तु यौवनावस्थां यावत् बालकाः शिक्षन्ते अथवा आत्मानं शिक्षयन्ति यत् तैः रोदनं न करणीयम् । यदि कश्चित् युवकः रुद्यात् तदा सः अनुभवति यत् अपरे बालकाः तस्य उपहासं करिष्यन्ति । अतः सः अन्येषां पुरतः रोदनात् आत्मानं नियन्त्रयति ।

"ताः कोमलमृदुस्वभावाः च सन्ति" "ताः अतीव सुशीलाः सन्ति" - एतादृशानि कथनानि स्वीकृत्य तेषाम् उपरि चर्चां कुर्वन्तु यत् एतानि वाक्यानि कथं बालिकासु च चरितार्थानि क्रियन्ते किं बालिकासु एते गुणाः जन्मनः एव जायन्ते अथवा किं ताः एतादृशं व्यवहारं समाजतः शिक्षन्ते ? तेषां बालिकानां विषये भवतां किं चिन्तनमस्ति याः कोमलमृदुस्वभावाः न भवन्ति तथा च उपद्रवं कुर्वन्ति ।

वयं निरन्तरम् इत्थं शृणुमः यत् बालकाः एतादृशाः भवन्ति बालिकाः च एतादृश्यः भवन्ति समाजस्य एताः मान्यताः वयमपि अविचिन्त्य यथावत् मन्यामहे । वयम् अङ्गीकुर्मः यत् अस्माकं व्यवहारः अपि एतादृशः एव भवेत् । वयं सर्वान् बालकान् सर्वाः बालिकाः च वाक्यस्य आदौ द्रष्टुमिच्छामः ।

**रूढिबद्धधारणानां निर्माणम्**

यदा वयं सर्वान् जनान् एकया एव दृष्ट्या पश्यामः अथवा तेषां विषये काञ्चित् धारणां धरामः तदा सा एव रूढिबद्धधारणा इति उच्यते । बहुधा वयं केषाञ्चित् विशिष्ट-देश-धर्म-लिंगादीनां कारणतः कञ्चित् जनं "एषः कृपणः अस्ति" "एषः अपराधी अस्ति" अथवा "एषः मूर्खः अस्ति" इति मन्यामहे । इत्थम् एतस्मात् कारणात् भवति यतोहि अस्माभिः तेषां विषये एषा दृढा धारणा मनसि धृता अस्ति तस्मात् कारणात् एवं भवति । प्रत्येकं देशे अथवा धर्मादिसमूहेषु कृपणाः अपराधिनः मूर्खाः च जनाः प्राप्यन्ते एव तेषां कारणात् तस्मिन् समूहे विद्यमानाः सर्वे जनाः तादृशः एव सन्ति इति एतादृशं चिन्तनम् उचितं नास्ति । एतादृश्यः अवधारणाः अस्मान् एतस्मात् चिन्तनात् वारयति यत् प्रत्येकं जनः पृथक् अस्ति तस्य सामर्थ्यं गुणाः च पृथक् सन्ति । वयम् एतद् न द्रष्टुं पारयामः यत् तस्य जनस्य स्वस्य विशिष्टाः गुणाः क्षमताः च सन्ति याः अन्येभ्यः पृथक् सन्ति ।

रूढिवादिधारणाः व्यापकसंख्यायां जनान् एकस्मिन्नेव सङ्कुचितचिन्तने निपातयन्ति । यथा मान्यता आसीत् वायुयानस्य संचालनं महिलाः न कर्तुं शक्नुवन्ति । एतासां धारणानां प्रभावः अस्मासु अपि भवति । बहुधा एताः धारणाः अस्मान् तादृशानि कार्याणि कर्तुं न प्रेरयति यानि वयं सम्भवतः कर्तुं शक्नुयाम ।

**असमानता भेदभावश्च**

भेदभावः तदा भवति यदा जनाः पूर्वाग्रहाणाम् अथवा रुढिबद्धधारणानाम् आधारेण व्यवहारं कुर्वन्ति । यदि भवन्तः जनान् अपमानयितुं



मुस्लिमानां विषये इयं सामान्यरूपेण रुढिबद्धधारणा अस्ति यत् ते बालिकानाम् अध्ययनैः रुचिमन्तः न भवन्ति अतः ते ताः बालिकाः विद्यालयं न प्रेषयन्ति। यद्यपि अध्ययनेभ्यः ज्ञायते यत् मुस्लिमानां निर्धनतात्र कारणमस्ति। निर्धनतायाः कारणाद् एव ते बालिकाः विद्यालयं न प्रेषयन्ति अथवा विद्यालयतः शीघ्रमेव निष्कासयन्ति। यत्र निर्धनानां कृते शिक्षां प्राप्तुम् उत्तमाः प्रयासाः कृताः सन्ति तत्र मुस्लिमाः स्वबालिकाः विद्यालयं प्रेषितवन्तः। उदाहरणार्थं केरले प्रायः विद्यालयाः गृहस्य समीपे सन्ति सर्वकारीयस्य बसयानस्य सुविधा अपि तत्र सम्यक् अस्ति यस्मात् शिक्षकाः अपि विद्यालयं गन्तुं सारल्यं अनुभवन्ति। तत्र षष्टिः प्रतिशतं प्रायः महिलाशिक्षकाः सन्ति। एतानि सर्वाणि कारकाणि निर्धनपरिवारस्य बालकानां विद्यालयं प्रति नयने साहाय्यं कृतवन्तः येषु मुस्लिमबालिकाः अपि सम्मिलिताः सन्ति। अपरेषु राज्येषु यत्र एतादृशाः प्रयासाः न कृताः तत्र निर्धनपरिवाराणां बालकाः विद्यालयं गन्तुं कष्टस्य अनुभवं कुर्वन्ति। ते मुस्लिमजनाः स्युः जनजातीयाः भवेयुः अथवा अनुसूचितजात्याः भवेयुः एतस्मात् स्पष्टीभवती यत् मुस्लिमबालिकानां विद्यालयतः अनुपस्थिते कारणं तासां धर्मः नास्ति परन्तु निर्धनता कारणमस्ति।

व्यवहरन्ति, यदि भवन्तः तान् जनान् केषुचित् गतिविधिषु भागग्रहणात् वारयन्ति, कस्याश्चित् शिष्टवृत्तेः वारयन्ति, कस्मिंश्चित् स्थानविशेषे ते वासं न कुर्युः तस्मात् वारयन्ति अथवा कूपतः हस्तकूपतः च जलं पूरयितुम् आज्ञां न यच्छन्ति अन्यैः उपयुक्तेषु चषकादिपात्रेषु तेभ्यः चायं पातुम् अनुमतिं न यच्छन्ति तर्हि एतस्य उपर्युक्तस्य चिन्तनस्य अभिप्रायः अस्ति यत् भवन्तः तैः सार्धं भेदभावं कुर्वन्ति।

भेदभावः विविधप्रकारेण भवितुं अर्हति भवन्तः गतपाठं स्मरन्तु तत्र प्रथमः समीरः द्वितीयः समीरः च परस्परं भिन्नौ आस्ताम्। उदाहरणार्थं तयोः धर्मः भिन्नः आसीत्। अयं विविधतायाः एकः पक्षः अस्ति। परन्तु इदं भेदभावस्य कारणम् अपि भवितुं अर्हति एवं तदा भवति यदा जनाः अन्येषां प्रथाः परम्पराः च स्वस्मात् अनुत्कृष्टं मन्यन्ते।

द्वयोः समीरयोः मध्ये एकम् अन्तरम् एतद् अपि आसीत् यत् तयोः द्वयोः आर्थिकपृष्ठभूमिः भिन्ना आसीत्। द्वितीयः समीरः निर्धनः आसीत्। यथा भवद्भिः पूर्वं पठितमस्ति। एषा भिन्नता विविधतायाः पक्षः नास्ति। इयं तु असमानता अस्ति। बहूनां जनानां पार्श्वे दैनन्दिनभोजनं वस्त्राणि गृहस्य नित्योपयोगिनि वस्तूनि साधनानि धनानि च न भवन्ति। एतस्मात् कारणात् तैः सार्धं चिकित्सालयेषु विद्यालयेषु कार्यालयादिषु च भेदभावः क्रियते।

केचन जनाः विविधतासम्बद्धस्य असमानतासम्बद्धस्य च उभयविधस्यापि भेदभावस्य सम्मुखीकरणं कुर्वन्ति। एकस्तु एतस्मात् कारणात् यतो हि ते तस्य समुदायस्य सदस्याः सन्ति येषां संस्कृतिः मूल्यवती नास्ति इति मन्यन्ते । ततोऽपि अधिकं ते निर्धनाः सन्ति अपि च तेषां पार्श्वे स्वस्य आवश्यकताः पूरयितुं साधनानि न सन्ति एतादृश्याम् अवस्थायाम् अपि तैः सार्धं भेदभावः क्रियते । एतादृशस्य द्विविधस्य भेदभावस्य सम्मुखीकरणं अनेकाः जनजातीयाः जनाः धार्मिकसमूहाः विशिष्टक्षेत्रस्य च जनाः कर्तुं बाध्याः सन्ति।



*जातिगतभेदभावस्य कारणतः कस्यापि बालकस्य कक्षातः बहिः स्थापनं जातिगत-भेदभावस्य उदाहरणमस्ति।*

### भेदभावस्य साक्षात्कारे कृते सति

स्वस्य आजीविकार्थं जनाः पृथक् - पृथक् कार्याणि यथा पाठनं पात्रनिर्माणं मत्स्यग्रहणं काष्ठकारकर्म कृषिकार्यं वयनादिकं च कुर्वन्ति। परन्तु कानिचन कार्याणि अन्येषां कार्याणाम् अपेक्षया महत्त्वपूर्णानि मन्यन्ते । स्वच्छता, वस्त्रप्रक्षालनम्, केशकर्तनम्, अवकरस्य उत्थापनसदृशानि कार्याणि न्यूनमहत्त्वयुक्तानि इति मन्यन्ते । अतः ये जनाः एतानि कार्याणि कुर्वन्ति ते मलिनाः अपवित्राः इति मन्यन्ते । अयं जातिव्यवस्थायाः कश्चित् अतिमहत्त्वपूर्णः पक्षः अस्ति । जातिव्यवस्थायां जनानां समूहाः सोपानस्य क्रमेण स्थापिताः यस्मिन् एका जातिः अपरस्याः जात्याः श्रेष्ठा अथवा अधमा आसीत्। ये आत्मानं एतस्य सोपानस्य प्रथमे स्थाने स्थापितवन्तः ते आत्मानम् उच्चजातेः उत्कृष्टाः च वयम् इति उक्तवन्तः। ये समूहाः सोपानस्य अन्ते स्थापिताः सन्ति ते अस्पृश्याः अयोग्याः वा उक्ताः सन्ति। जातिप्रथायाः नियमाः निश्चिताः आसन्। एतेषाम् अस्पृश्यानां कृते यत् कार्यं प्रदत्तं तदतिरिच्य अन्यानि कार्याणि कर्तुम् स्वतन्त्रता न आसीत्। उदाहरणार्थं केषाञ्चित् समूहानां कृते केवलं अवकर-उत्थापनस्य अपि च मृतपशूनां ग्रामतः अपसारणस्य एव आज्ञा आसीत्। ते उच्चजाति-जनानां गृहं प्रवेष्टुं कूपतः जलं नेतुं मन्दिरं च प्रवेष्टुम् अधिकारिणः न आसन्। तेषां बालकाः विद्यालये उच्चजातीयैः बालकैः सह न उपवेष्टुं शक्नुवन्ति

> दलितः इति सः शब्दः अस्ति यं निम्नजातेः जनाः स्वपरिचयस्य रूपे प्रयोगं कुर्वन्ति । तेभ्यः अयं शब्दः **अस्पृश्यः** इति शब्दात् अधिकं रोचते । दलितशब्दस्य तात्पर्यम् अस्ति- येषां दलनं कृतम्, ये पीडिताः सन्ति इति । दलितानाम् अनुसारेण अयं शब्दः दर्शयति यत् कथं सामाजिकैः पूर्वाग्रहैः भेदभावैः च दलितानां दमनं कृतम् आसीत्, कथं ते पीडिताः आसन् । सर्वकारः तादृशान् जनान् अनुसूचितजाति- इत्यस्मिन् वर्गे स्थापयति ।

स्म । अनेन प्रकारेण उच्चजातेः जनेभ्यः ये अधिकाराः प्राप्ताः आसन् तेन ते अस्पृश्यान् जनान् तेभ्यः अधिकारेभ्यः वञ्चितान् कृतवन्तः ।

अग्रिमे पृष्ठे वयं द्रक्ष्यामः यत् कथं भारतस्य कश्चित् प्रसिद्धः जनः भेदभावस्य सम्मुखीकरणं कर्तुं बाध्यः आसीत् । अयं भागः अस्माकम् अवबोधे साहाय्यं करिष्यति यत् कथं जातेः कारणात् व्यापकसंख्यायां जनाः भेदभावेन ग्रस्ताः जाताः ।

भारतस्य कश्चित् महान् नेता डा-अम्बेडकरः जातिव्यवस्थाधारितस्य भेदभावस्य विषये

> रूढिबद्धासु धारणासु भेदभावे च किम् अन्तरमस्ति ? भवताम् अनुसारं येन जनेन सह भेदभावः भवति सः कथम् अनुभवति ?

स्वानुभवानां विषये लिखितवान् अस्ति । एषः अनुभवः तेन १९०१ तमे वर्षे अनुभूतः यदा सः केवलं नववर्षीयः आसीत् । तदा सः महाराष्ट्रस्य कोरेग्रामं स्वभ्रातृभिः सह पित्रा सह मेलितुं गतवान् आसीत् ।

सः उक्तवान् चिरकालं यावत् अस्माभिः प्रतीक्षा कृता परन्तु कश्चिदपि अस्मान् नेतुं न आगतवान् । होरायां व्यतीतायां सत्यां रेलस्थानकाधिकारी (स्टेशनमास्टर) अस्मान् प्रष्टुम् आगतवान् । सः अस्मभ्यम् अस्माकं चिटिकाः याचितवान् अस्माभिः ताः दर्शिताः । सः अस्मान् पृष्टवान् यत् भवन्तः अत्र किमर्थं स्थिताः सन्ति । अस्माभिः सः बोधितः यत् अस्माभिः कोरेग्रामं गन्तव्यम् अस्ति परन्तु वयं पितुः तस्य सेवकस्य वा प्रतीक्षायाम् आस्म । परन्तु द्वयोः कश्चिदपि न आगतवान् तथा च वयं न जानीमः यत् कोरेग्रामं प्रति

डा. भीमराव-अम्बेडकरः (१८९१-१९५६) भारतीयसंविधानस्य निर्माता दलितानां च महान् नेतृरूपेण ज्ञायते । अम्बेडकरः दलितसमुदायस्य अधिकारान् अभिलक्ष्य सङ्घर्षं कृतवान् आसीत् । तस्य जन्म महारजातौ अभवत् महारजातिः अस्पृश्या इति मन्यते स्म। महार-जनाः निर्धनाः भवन्ति स्म तेषां पार्श्वे कृषियोग्यभूमिः न भवति स्म, तेषां बालकैः अपि तदेव कार्यं करणीयं भवति स्म यत् कार्यं तेषाम् अभिभावकाः कुर्वन्ति स्म । तैः ग्रामाद् बहिः उषितव्यम् आसीत् ग्रामं अन्तरा ते न वस्तुं शक्नुवन्ति स्म । अम्बेडकरः स्वजातौ प्रथमः जनः आसीत् यः स्नातकोपाधिं प्राप्तवान् अपि च अधिवक्ता भवितुं इग्लैंडदेशं गतवान् । सः दलितान् बालकान् विद्यालयं प्रेषयितुम् उक्तवान् प्रोत्साहितवान् च । दलिताः विभिन्नानि सर्वकारीयानि सेवाकार्याणि कुर्युः इति उक्तवान् यस्मात् च ते जातिव्यवस्थातः बहिः आगन्तुं शक्नुयुः । दलिताः मन्दिरमपि प्रविशेयुः एतदर्थं ये प्रयासाः क्रियन्ते स्म तत्र अम्बेडकरेण नेतृत्वं कृतम्। सः तस्य धर्मस्य अन्वेषणं करोति स्म यः धर्मः सर्वान् समानदृष्ट्या पश्येत्। अग्रे स्वजीवने सः बौद्धधर्मं स्वीकृतवान् । तस्य मन्तव्यम् आसीत् यत् दलिताः जातीयभेदभावस्य कुप्रथायाः च विरोधे सङ्घर्षं कुर्युः तथा च तादृशस्य समाजस्य निर्माणं भवेत् यत्र सर्वेषां सम्मानं भवेत् न तु केवलं केषाञ्चित् जनानामेव ।





कथं गन्तव्यं भवति । अस्माभिः उत्तमानि वस्त्राणि धृतानि आसन् अतः अस्माकं भाषां वस्त्रं च दृष्ट्वा कश्चिदपि एतत् न अवगन्तुं शक्नोति स्म यत् वयं दलितबालकाः स्मः । निश्चयेन रेलस्थानकाधिकारी (स्टेशनमास्टर) अनुभूतवान् यत् वयं ब्राह्मणबालकाः स्मः सः अस्माकं समस्यां दृष्ट्वा चिन्तामग्नः जातः यथा हिन्दूषु भवत्येव रेलस्थानकाधिकारी अस्मान् पृष्टवान् यत् वयं कस्य बालकाः स्मः । तदा अविचिन्त्य एव अर्थात् सहजभावेन मम मुखात् निःसृतं यत् वयं महार-जातयः स्मः । *(मुम्बईप्रान्ते महारजातयः अस्पृश्याः इति मन्यन्ते स्म ।)* रेलस्थानकाधिकारी सहसा आश्चर्यपुरस्सरं दृष्टवान् तस्य मुखमण्डले सहसा परिवर्तनं जातम् । अस्माभिः दृष्टं यत् कस्याश्चित् विचित्रायाः घृणायाः भावना तस्य मनः आक्रान्तवती । सः यदा मम उत्तरं श्रुतवान् तदा एव सः स्वप्रकोष्ठं गतवान् वयं च तत्रैव स्थिताः आस्म । पंचदश-विंशति-कलाः व्यतीताः सूर्यः अस्तं प्रति गच्छति स्म । पिता न आगतवान् न च तस्य सेवकः एव अधुना रेलस्थानकाधिकारी अपि अस्मान् परित्यज्य गतवान् । वयम् अतीव भयभीताः आस्म । यात्रायाः आरम्भे यः उत्साहः प्रसन्नता च आसीत् तस्य स्थाने अधुना आधिक्येन उदासीनता आसीत् ।

अर्धहोरानन्तरम् अधिकारी तत्र आगतवान् तदा सः पृष्टवान् यत् भवन्तः किं कर्तुं चिन्तयन्ति अस्माभिः उक्तं यत् यदि अस्मभ्यं भाटकेन कश्चित् शकटः लभ्येत तदा वयं कोरेग्रामं गन्तुं शक्ष्यामः ।

यदि कोरेग्रामः अतिदूरं न स्यात् तर्हि वयं शीघ्रम् इतः पादाभ्यां गन्तुम् इच्छामः । तत्र भाटकेन अनेकानि शकटानि चलन्ति स्म । परन्तु अहं रेलस्थानकाधिकारिणः समक्षे यद् उक्तवान् आसम् वयं महाराः स्मः स्मः इति तत् तु सर्वे ज्ञातवन्तः । कोऽपि वाहनचालकः अस्पृश्यवर्गस्य यात्रिणः नीत्वा आत्मानं मालिन्य-युक्तं क्षुद्रतां च प्रति न नेतुम् इच्छति स्म । वयं द्विगुणितं भाटकं दातुम् अपि सज्जाः आस्म परन्तु अस्माभिः अनुभूतं यत् धनेन कार्यं न सेत्स्यति । रेलस्थानकाधिकारी यः अस्माकं कृते वाहनस्य व्यवस्थां करोति स्म तथा च भाटकस्य विषये वाहनचालकान् पृच्छति स्म सः तत्र तूष्णीं भूत्वा स्थितवान् । न ज्ञायते स्म यत् किं करवाम ?

स्रोतः – डांबी-आर.अम्बेडकरः, राइटिंग-एंड-स्पीचेज-खण्ड-१२, सम्पादनम् – वंसतमूनः, बम्बई-शिक्षा-विभागः, महाराष्ट्रसर्वकारः ।

कल्पनां कृत्वा पश्यन्तु यत् इदं कियत् कठिनं भविष्यति यदि जनाः एकस्मात् स्थानात् अपरस्थानं प्रति न गन्तुं पारयेयुः । एतद् कियत् अपमानजनकं दुःखप्रदं च भविष्यति यदि जनाः भवद्भ्यः दूरे तिष्ठेयुः भवन्तं न स्प्रष्टुम् इच्छेयुः अपि च भवते पातुं जलं न यच्छेयुः । इयं लघ्वी घटना दर्शयति यत् वाहनद्वारा एकस्मात् स्थानात् अपरं स्थानं प्रति गमनस्य सौविध्यमपि एतेषां बालकानां पार्श्वे नासीत् यद्यपि धनं दातुं समर्थाः आसन् । रेलस्थानकस्य सर्वैः वाहनचालकैः बालकान् नेतुम् अस्वीकृतिः प्रकटिता । ते बालकैः सह भेदभावपूर्णं व्यवहारं कृतवन्तः ।

अनया कथया पूर्णतः स्पष्टमस्ति यत् जात्याधारितः भेदभावः न दलितान् न केवलं अनेकेभ्यः गतिविधिभ्यः वञ्चितान् करोति स्म अपितु एतादृशः व्यवहारः तेषां सम्मानस्य अपि हानिं करोति यः सम्मानः अपरेषां कृते सुलभः भवति ।

**समानतायाः कृते सङ्घर्षः**

ब्रिटिश-शासनात् स्वातन्त्र्यं प्राप्तुं यः सङ्घर्षः अस्माभिः कृतः आसीत् तस्मिन् समानतायाः व्यवहाराय कृतः सङ्घर्षः अपि सम्मिलितः आसीत् । दलितजनैः महिलाभिः जनजातीय-जनैः कृषकैः च स्वजीवने यः असमानतायाः अनुभवः कृतः आसीत् तस्य विरोधे ते संङ्घर्षं कृतवन्तः । यथा पूर्वमपि चर्चा जाता बहवः दलिताः मन्दिरं प्रवेष्टुं संङ्घर्षं कृतवन्तः । महिलाः याचनां कृतवत्यः यत् यथा पुरुषाणां पार्श्वे शिक्षायाः अधिकारः अस्ति तथैव तासां कृते अपि अधिकारः भवेत् । कृषकाः



*स्वाधिकारान् याचमानाः महिलाः*

*बालकाः धनं दातुं सज्जाः आसन् तथापि वाहनचालकाः तान् नेतुम् अस्वीकृतवन्तः । किमर्थम् ?
*रेलस्थानके जनाः कथम् अंबेडकरेण तस्य भ्रातृभिः च सह भेदभावं कृतवन्तः ?
* एषः महारः अस्ति इति ज्ञात्वा रेलस्थानकाधिकारिणः (स्टेशनमास्टर) या प्रतिक्रिया आसीत् तां दृष्ट्वा बाल्यकाले अंबेडकरः कथम् अनुभूतवान् स्यात् ? स्वशब्देषु वर्णनं कुर्वन्तु ।
* किं भवन्तः आत्मानं प्रति जनानां पूर्वाग्रहभावम् अनुभूतवन्तः ? अथवा भवन्तः अन्यान् प्रति कस्यचित् भेदभावस्य व्यवहारं दृष्टवन्तः ? तदा भवन्तः किम् अनुभूतवन्तः ?



*भारतीयसंविधानलेखक-समितेः केचन सदस्याः*

दलिताः च आत्मानं भूस्वामिभ्यः तथा च तेषां द्वारा गृह्यमानात् उच्चव्याजमात्रातः आत्मानं रक्षितुं संघर्षं कृतवन्तः ।

१९४७ तमे वर्षे यदा भारतं स्वातन्त्र्यम् अलभत तदा अस्माकं नेतृभिः समाजे व्याप्तस्य अनेकप्रकारस्य असमानभावस्य विषये चिन्तनं कृतम् । संविधानस्य लेखकाः अपि एतस्मिन् विषये जानन्ति स्म यत् कथम् अस्माकं समाजे जनैः भेदभावः क्रियते अपि च जनाः तं विरुद्ध्य कथं संघर्षं कृतवन्तः । बहवः नेतारः एतेषां सङ्घर्षाणां भागभूताः आसन् यथा डा. अंबेडकरः । एतस्मात् कारणात् नेतारः एतादृशीं दृष्टिं लक्ष्यं च दर्शितवन्तः येन भारते सर्वे जनाः समानाः भवेयुः । समानता मूलभूतं मूल्यमिति दृष्ट्या स्वीकृता या अस्मान् सर्वान् भारतीयान् परस्परं भारतीयरूपेण योजयति । प्रत्येकं जनस्य कृते समानाः अवसराः अधिकाराः च प्रदत्ताः सन्ति । अस्पृश्यता अपराधवत् दृश्यते तथा च एषा अधिनियम-व्यवस्थया समाप्तिं नीता अस्ति ।

---

दलित-समुदायम् अतिरिच्य अन्ये अपि अनेके समुदायाः सन्ति यैः सार्धं भेदभावः क्रियते । किं भवन्तः भेदभावस्य अन्योदाहरणानां विषये चिन्तयितुं शक्नुवन्ति?

तेषु विषयेषु चर्चां कुर्वन्तु येषाम् माध्यमेन “विशेषावश्यकतावद्भिः” जनैः सह भेदभावः कर्तुं शक्यते ।

---

जनाः स्वरुच्यनुगुणं कार्याणि चेतुं पूर्णतया स्वतन्त्राः सन्ति । वृत्तेः अवसराः सर्वेषां जनानां कृते उद्घटिताः सन्ति । एतदतिरिच्य संविधानेन सर्वकारस्य कृते एतत् दायित्वं प्रदत्तमस्ति यत् सर्वकारः निर्धनानां कृते तथा च ये जनाः मुख्यधारातः बहिष्कृताः सन्ति तेषां समुदायानां कृते समानतायाः अधिकाराणां लाभं प्रापयितुं कार्याणि कुर्यात् ।



भारत का संविधान

उद्देशिका

हम, भारत के लोग, भारत को एक ¹[संपूर्ण प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य] बनाने के लिए, तथा उसके समस्त नागरिकों को :

सामाजिक, आर्थिक और राजनैतिक न्याय,

विचार, अभिव्यक्ति, विश्वास, धर्म और उपासना की स्वतंत्रता,

प्रतिष्ठा और अवसर की समता

प्राप्त कराने के लिए,

तथा उन सब में

व्यक्ति की गरिमा और ²[राष्ट्र की एकता और अखंडता] सुनिश्चित करने वाली बंधुता

बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवंबर, 1949 ई. को एतद्द्वारा **इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।**

1. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

*संविधानस्य प्रथमं पृष्ठं यत्र स्पष्टतया लिखितम् अस्ति यत् सर्वे भारतीयाः समानप्रतिष्ठां समानावसरान् च प्राप्नुयुः ।*

संविधानलेखकैः इदमपि कथितं यत् विविधतायाः सम्मानः स्यात् तथा च विविधता मूल्यवती अस्ति इत्येषा दृष्टिः स्थापनीया तथा च समानतायाः भावं सुनिश्चितं कर्तुं एतानि उपर्युक्तानि कारकाणि सहायकानि भविष्यन्ति। ते अनुभूतवन्तः यत् जनानां कृते तेषाम् उत्सवान् आयोजयितुं धर्मं पालयितुं स्वभाषां वक्तुं आत्मानं आत्मानं स्वतन्त्ररूपेण अभिव्यक्तीकर्तुं च स्वतन्त्राः भवेयुः। ते उक्तवन्तः यत् कश्चित् उत्सवः काचित् भाषा किञ्चन पर्व च सर्वेषां कृते अनिवार्यं न भवेत् ते उक्तवन्तः यत् सर्वकारः सर्वान् धर्मान् समानरूपेण द्रक्ष्यति मंस्यते च। अतः भारतं धर्मनिरपेक्षदेशः अस्ति यत्र जनाः भेदभावं परित्यज्य स्वधर्मस्य पालनं कुर्वन्ति। एतदेव अस्माकम् एकतायाः महत्त्वपूर्णं कारकम् दृश्यते यत् वयं सम्भूय निवसामः तथा च परस्परं सम्मानं कुर्मः।

यद्यपि अस्माकं संविधाने एतेषां विचाराणाम् उपरि बलाघातः कृतः परन्तु अस्मिन् पाठे एतादृशी एव चर्चा यत् असमानता अद्यापि अस्ति। समानता तादृशं मूल्यवत् वस्तु अस्ति यस्य कृते अस्माभिः नैरन्तर्येण सङ्घर्षः करणीयः स्यात्। भारतीयानां कृते समानतायाः मूल्यं वास्तविकजीवनस्य भागभूतं स्यात् एतदर्थं जनानां सङ्घर्षाः तेषाम् आन्दोलनानि सर्वकारेण क्रियमाणानि कार्याणि च महत्त्वपूर्णानि सन्ति।

## अभ्यासः

१. निम्नलिखितकथनानां मेलनं कुर्वन्तु। रूढिबद्धधारणानां कृते कीदृशानि आह्वानानि सन्ति, एतस्मिन् विषये चर्चां कुर्वन्तु-

| | |
|---|---|
| (क) द्वौ चिकित्सकौ भोजनं कुर्वन्तौ आस्तां तयोः एकः दूरवाण्या दूरवाणीं कृत्वा | १. श्वासरोगस्य पुरातनः रोगी अस्ति |
| (ख) येन बालकेन चित्रकलाप्रतियोगिता विजिता, सः मञ्चे | २. अन्तरिक्षयात्रीभवनस्य स्वप्नः अन्ततः पूर्तिम् अगात्। |
| (ग) संसारस्य सर्वेषु तीव्रतमेषु धावकेषु एकः | ३. स्वपुत्र्या वार्ता कृता या तस्मिन् समये विद्यालयतः प्रत्यागता आसीत्। |
| (घ) सा बहुधनाढ्या नास्ति परन्तु तस्याः | ४. पुरस्कारं प्राप्तुं केनचित् चक्रासन्देन गतवान् |

२. बालिकाः माता-पित्रोः कृते भारभूताः सन्ति, इयं रूढिबद्धा धारणा कस्याश्चित् कन्यायाः जीवनं कथं प्रभावयति? तस्य पृथक्-पृथक् पञ्चप्रभावाणाम् उल्लेखं कुर्वन्तु।

३. भारतस्य संविधानं समानतायाः विषये किं कथयति? भवन्तः कस्मात् कारणात् अनुभवन्ति यत् जनेषु समानता अवश्यमेव भवितव्या?

४. कदाचित् जनाः अस्माकम् उपस्थितौ एव पूर्वाग्रहप्रेरितम् आचरणं कुर्वन्ति। एतस्याम् अवस्थायां वयं कस्यचित् विरोधकरणस्य स्थितौ न भवामः, यतोहि सम्मुखे किमपि कथने काठिन्यम् अनुभूयते। स्वकक्षां द्वयोः समूहयोः विभज्यताम् अपि च प्रत्येकं समूहः एतस्मिन् विषये चर्चां कुर्यात् यत् प्रदत्तपरिस्थितौ ते किं करिष्यन्ति?

(क) निर्धनतायाः कारणात् कस्यचित् सहपाठिनः भवतः मित्रं उपहासं करोति।

(ख) भवान् स्वपरिवारेण सह दूरदर्शनं पश्यति तत्र कश्चित् सदस्यः कस्मिंश्चित् धार्मिकसमुदाये पूर्वाग्रहग्रस्तटिप्पणीं करोति।

(ग) भवत्याः कक्षायाः बालकाः कयाचित् बालिकया सह भोजनं कर्तुम् अनङ्गीकुर्वन्ति यतोहि ते चिन्तयन्ति यत् सा मलिना अस्ति।

(घ) कस्यचित् समुदायविशेषस्य उच्चारणस्य परिहासं कुर्वन् कश्चित् भवन्तं हास्यकणिकां श्रावयति।

(ङ) बालकाः बालिकानां विषये टिप्पणीं कुर्वन्ति यत् ताः बालिकाः बालकानाम् इव न क्रीडितुं शक्नुवन्ति।

उपर्युक्त-परिस्थितिषु विभिन्नसमूहाः कीदृशस्य व्यवहारस्य विषये वार्तां कृतवन्तः सन्ति, एतस्मिन् विषये कक्षायां चर्चां कुर्वन्तु सार्धमेव एतेषां प्रकरणानाम् अथवा अभिप्रायाणाम् उपरि चर्चाकाले कक्षायां काः काः समस्याः आगन्तुं शक्नुवन्ति एतस्मिन् विषये अपि वार्तालापं कुर्वन्तु।

इति द्वितीयः अध्यायः